# Shri Raghavendra Apatpariharana Stotram

# શ્રીરાઘવેન્દ્ર આપત્પરિહરણસ્તોત્રમ્

## Document Information

Text title : Shri Raghavendra Apatpariharana Stotram

File name : rAghavendraApatpariharaNastotram.itx

Category : deities_misc, gurudev, stotra

Location : doc_deities_misc

Author : Krishna Avadhutapandita Vedavyasacharya

Proofread by : Gopalakrishnan, PSA Easwaran

Description/comments : from Raghavendra Tantram

Latest update : December 18, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 20, 2023

*sanskritdocuments.org*

# શ્રીરાઘવેન્દ્ર આપત્પરિહરણસ્તોત્રમ્

શ્રીકામુકાય બહુશોકાય તત્સુખમભીકાશુ યચ્છસિ હિ ભો
 લોકાય તદ્દુરિતપાકાપ્ત પઙ્ગુજડમૂકાદિભાવહરણ ।
શ્રીરાઘવેન્દ્રપદવીર્યાદિભોગભવઘોરાઘમાશુ હર ભો
 દારાત્મજાદિભવવારાશિસમ્ભવદપારાપદઃ શમય ભોઃ ॥ ૧॥

રાજાદિ ભક્તજન પૂજાલસત્પદપયોજામ્બુબિન્દુરપિ
 બીજાયતે સુવિધિભુજાય દૂનનૃષુ તે જાગરૂકકરુણઃ ।
શ્રીરાઘવેન્દ્રપદવર્યાદિભોગભવઘોરાઘમાશુ હર ભોઃ
 દારાત્મજાદિભવવારાશિસમ્ભવદપારાપદઃ શમય ભોઃ ॥ ૨॥

ઘોટીમદેભવરશાટીવિરાજિનૃપકોટીશિરોવિધૃત-
 કોટીરરત્નપરિપાટીભૃશારુણિતપાટીરપાદુક વિભો ।
શ્રીરાઘવેન્દ્રપદવીર્યાદિભોગભવઘોરાઘમાશુ હર ભોઃ
 દારાત્મજાદિભવવારાશિસમ્ભવદપાપાપદઃ શમય ભોઃ ॥ ૩॥

વેદાદિદૂષકકુવાદાદરાધ્ય સુમોદાવદાહકમહા-
 દાવદોષવિધુરે દાનવદ્વિષિ મમાદાય ધેહિ હૃદયમ્ ।
શ્રીરાઘવેન્દ્રપદવીર્યાદિભોગભવઘોરાઘમાશુ હર ભોઃ
 દારાત્મજાદિ ભવવારાશિ સમ્ભવદપારાપદઃ શમય ભોઃ ॥ ૪॥

દ્રાક્ષામધુક્ષરણ શૈક્ષાકરામલ કટાક્ષાવલોકત ઉત
 તત્ક્ષામતાં હરસિ ભૈક્ષાટકસ્ય ભુવિ લક્ષાધિકસ્ય સપદિ ।
શ્રીરાઘવેન્દ્ર પદવરીયાદિ ભોગભવ ઘોરાઘમાશુ હર ભોઃ
 ધારાત્મજાદિ ભવવારાશૈ સમ્ભવદપારાપદઃ શમયો ભોઃ ॥ ૫॥

યાનાદિસમ્પદમનૂનામવાપ્નુમહમાનાયિ પૂર્વસૃકૃ
 તેનાગ્ર્યતે પદમતોઽનાદિ દુર્દુરિતમાનાશયાશુ મમભોઃ ।
શ્રીરાઘવેન્દ્ર પદવીર્યાદિ ભોગભવ ઘોરાઘમાશુ હર ભોઃ
 દારાત્મજાદિ ભવવારાશિ સમ્ભવદપારાપદઃ શમય ભોઃ ॥ ૬॥

નાગારિવાહપદયોગાદરામિતદાગારદારધન
ભોગાવનામુમનુરાગત તવાભિમતિવેગાદુપૈમિ સુખદમ્ ।
શ્રીરાઘવેન્દ્ર પદવીર્યાદિ ભોગભવ ઘારાઘમાશુ હર ભોઃ
દારાત્મજાદિ ભવવારાશિ સમ્ભવદપારાપદઃ શમય ભોઃ ॥ ૭॥

મન્ત્રાલયસ્ય તવ મન્ત્રાદિજમુરરિમન્ત્રાદિ સંહતિત
તન્ત્રાભવત્યખિલતન્ત્ર્યાધિકેષ્વપરતન્ત્રાવમામુપગતમ્ ।
શ્રીરાઘવેન્દ્ર પદવીર્યાદિ ભોગભવ ઘોરાઘમાશુ હર ભોઃ
દારાત્મજાદિ ભવવારાતિ સમ્ભવદપારાપદઃ શમય ભોઃ ॥ ૮॥

કૃષ્ણાવધૂતકૃતમિષ્ટાર્થદાનચણમષ્ટાર્થમન્ત્ર પરિ
પુષ્ટાતુલસ્તમવકષ્ટાવહ શુભમરિષ્ટાહરં પઠતિયઃ ।
શ્રીરાઘવેન્દ્ર પદવીર્યાદિ ભોગભવ ઘોરાઘમાશુ હર ભોઃ
દારાત્મજાદિ ભવવારાશિસમ્ભવદપારાપદઃ શમય ભોઃ ॥ ૯॥

ઇતિ શ્રીકૃષ્ણાવધૂતવિરચિતે શ્રીરાઘવેન્દ્રતન્ત્રે નવમપટલે
આપત્પરિહરણસ્તોત્રમ્ નામ દ્વિતીયોઽધ્યાયઃ સમ્પૂર્ણઃ ।

Proofread by Gopalakrishnan, PSA Easwaran

*Shri Raghavendra Apatpariharana Stotram*
pdf was typeset on May 20, 2023

Please send corrections to *sanskrit@cheerful.com*